# shrIlakShmI visheShamantrAH

# શ્રીલક્ષ્મી વિશેષમન્ત્રાઃ

## Document Information

Text title : lakShmIvisheShamantrAH

File name : lakShmIvisheShamantrAH.itx

Category : devii, lakShmI, devI, mantra

Location : doc_devii

Proofread by : PSA Easwaran

Description/comments : shrIlakShmIkaTAkSha S K Rajagopalan 2001 collection of Laxmistotras

Latest update : May 5, 2017, July 5, 2021, July 5, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

# શ્રીલક્ષ્મી વિશેષમન્ત્રાઃ

ચતુરક્ષર લક્ષ્મીમન્ત્રમ્
અસ્ય શ્રીચતુરક્ષરલક્ષ્મીમહામન્ત્રસ્ય -
ભૃગુ ઋષિઃ - નિચૃચ્છન્દઃ - શ્રીલક્ષ્મીઃ દેવતા -
મમ સર્વાભીષ્ટસિદ્ધ્યર્થે જપે વિનિયોગઃ ।
ઋષ્યાદિ ન્યાસઃ
ભૃગુ ઋષયે નમઃ શિરસિ - નિચૃચ્છન્દસે નમઃ મુખે
શ્રીલક્ષ્મી દેવતાયૈ નમઃ હૃદિ - વિનિયોગાય નમઃ સર્વાઙ્ગે
કરન્યાસઃ
ૐ શ્રાં અઙ્ગુષ્ટાભ્યાં નમઃ ।
ૐ શ્રીં તર્જનીભ્યાં નમઃ ।
ૐ શ્રૂં મધ્યમાભ્યાં નમઃ ।
ૐ શ્રૈં અનામિકાભ્યાં નમઃ ।
ૐ શ્રૌં કનિષ્ઠિકાભ્યાં નમઃ ।
ૐ શ્રઃકરતલકરપૃષ્ઠાભ્યાં નમઃ ॥

ૐ શ્રાં જ્ઞાનાય હૃદયાય નમઃ ।
ૐ શ્રીં ઐશ્વર્યાય શિરસે સ્વાહા ।
ૐ શ્રૂં શક્ત્યૈ શિખાયૈ વષટ્ ।
ૐ શ્રૈં બલાય કવચાય હું ।
ૐ શ્રૌં તેજસે નેત્રાભ્યાં વૌષટ્ ।
ૐ શ્રઃ વીર્યાય અસ્ત્રાય ફટ્ ।
ૐ ભૂર્ભુવસ્સુવઃ ઇતિ દિગ્બન્ધઃ ॥

ધ્યાનમ્ ।
માણિક્યપ્રતિમપ્રભાં હિમનિભૈસ્તુઙ્ગૈશ્ચતુર્ભિર્ગજૈઃ,
હસ્તગ્રાહિતરત્નકુભસલિલૈરાસિચ્યમાનાં મુદા ।
હસ્તાબ્જૈર્વરદાનમમ્બુજયુગાભીતિર્દધાનાં હરેઃ,

કાન્તાં કાઙ્ક્ષિતપારિજાતલતિકાં વન્દે સરોજાસનામ્ ॥

મૂલમન્ત્રઃ - ઐં - શ્રીં - હ્રીં - ક્લીં ।

ષડક્ષરી શ્રીમન્ત્રમ્
અસ્ય શ્રીમન્ત્રસ્ય - ભૃગુઃ ઋષિઃ - નિચૃચ્છન્દઃ -
શ્રીમહાલક્ષ્મીઃ દેવતા - સર્વયન્ત્રસ્ય પ્રાણપ્રતિષ્ઠાદિ
સર્વતેજોબલપ્રકાશાદિ સર્વશક્ત્યાપ્તયે જપે વિનિયોગઃ ।
ૐ બીજં- શ્રીં શક્તિઃ -શ્રિયૈ કીલકમ્ ।
ઋષ્યાદિ ન્યાસઃ
ભૃગુ ઋષયે નમઃ શિરસિ - નિચૃચ્છન્દસે નમઃ મુખે
શ્રીમહાલક્ષ્મી દેવતાયૈ નમઃ હૃદિ - વિનિયોગાય નમઃ સર્વાઙ્ગે
કરન્યાસઃ
ૐ શ્રાં અઙ્ગુષ્ટાભ્યાં નમઃ ।
ૐ શ્રીં તર્જનીભ્યાં નમઃ ।
ૐ શ્રૂં મધ્યમાભ્યાં નમઃ ।
ૐ શ્રૈં અનામિકાભ્યાં નમઃ ।
ૐ શ્રૌં કનિષ્ઠિકાભ્યાં નમઃ ।
ૐ શ્રઃ કરતલકરપૃષ્ઠાભ્યાંનમઃ ।
હૃદયાદિન્યાસઃ
ૐ શ્રાં જ્ઞાનાય હૃદયાય નમઃ ।
ૐ શ્રીં ઐશ્વર્યાય શિરસે સ્વાહા ।
ૐ શ્રૂં શક્ત્યૈ શિખાયૈ વષટ્ ।
ૐ શ્રૈં બલાય કવચાય હું ।
ૐ શ્રૌં તેજસે નેત્રાભ્યાં વૌષટ્ ।
ૐ શ્રઃ વીર્યાય અસ્ત્રાય ફટ્ ।
ૐ ભૂર્ભુવસ્સુવરોમ્ ઇતિ દિગ્બન્ધઃ ॥

ધ્યાનમ્
વન્દે પદ્મકરાં પ્રસન્નવદનાં સૌભાગ્યદાં ભાગ્યદાં
હસ્તાભ્યામભયપ્રદાં મણિગણૈર્નાનાવિધૈર્ભૂષિતામ્ ।
ભક્તાભીષ્ટફલપ્રદાં હરિહરબ્રહ્માદિભિસ્સેવિતાં
પાર્શ્વે પઙ્કજશઙ્ખપદ્મનિધિભિર્યુક્તાં સદા શક્તિભિઃ ॥

મૂલમન્ત્રઃ - ૐ - શ્રીં - શ્રિયૈ - નમઃ ।

શ્રીલક્ષ્મી બીજમન્ત્રમ્
અસ્ય શ્રી એકાક્ષરીલક્ષ્મીમહામન્ત્રસ્ય -
ભૃગુઃ ઋષિઃ - નિચૃચ્છન્દઃ - શ્રીલક્ષ્મીઃ દેવતા -
મમ ધનાપ્તયે જપે વિનિયોગઃ ।
ઋષ્યાદિ ન્યાસઃ
ભૃગુ ઋષયે નમઃ શિરસિ - નિચૃચ્છન્દસે નમઃ મુખે
શ્રીલક્ષ્મી દેવતાયૈ નમઃ હૃદિ - વિનિયોગાય નમઃ સર્વાઙ્ગે
કરન્યાસઃ
ૐ શ્રાં અઙ્ગુષ્ટાભ્યાં નમઃ ।
ૐ શ્રીં તર્જનીભ્યાં નમઃ ।
ૐ શ્રૂં મધ્યમાભ્યાં નમઃ ।
ૐ શ્રૈં અનામિકાભ્યાં નમઃ ।
ૐ શ્રૌં કનિષ્ઠિકાભ્યાં નમઃ ।
ૐ શ્રઃકરતલકરપૃષ્ઠાભ્યાં નમઃ ॥

હૃદયાદિ ન્યાસઃ
ૐ શ્રાં હૃદયાય નમઃ ।
ૐ શ્રીં શિરસે સ્વાહા ।
ૐ શ્રૂં શિખાયૈ વષટ્ ।
ૐ શ્રૈં કવચાય હું ।
ૐ શ્રૌં નેત્રાભ્યાં વૌષટ્ ।
ૐ શ્રઃ અસ્ત્રાય પટ્ ।
ૐ ભૂર્ભુવસ્સુવરોમ્ ઇતિ દિગ્બન્ધઃ ॥

ધ્યાનમ્ ।
કાન્ત્યા કાઞ્ચનસન્નિભાં હિમગિરિપ્રખ્યૈશ્ચતુર્ભિર્ગજૈઃ
હસ્તાક્ષિમહિરણ્મયામૃતઘટૈરાસિચ્યમાનાં શ્રિયમ્ ।
બિભ્રાણાં વરમબ્જયુગ્મમભયં હસ્તૈઃ કિરીટોજ્જ્વલાં
ક્ષૌમાબદ્ધનિતમ્બબિમ્બલસિતાં વન્દેઽરવિન્દસ્થિતામ્ ॥

(ધ્યાનાનન્તરં સર્વતોભદ્રમણ્ડલે મણ્ડૂકાદિ પરતત્વાન્તપીઠદેવતાઃ
સંસ્થાપયેત્ - સમ્પૂજયેત્તતઃ પૂર્વદ્યષ્ટસુ દિક્ષુ નવપીઠશક્તીઃ પૂજયેત્ ।)

પૂર્વે - ૐ વિભૂત્યૈ નમઃ । આગ્નેયે - ૐ ઉન્મત્યૈ નમઃ ।
દક્ષિણસ્યાં - ૐ કાન્ત્યૈ નમઃ । નૈરૃત્યે - ૐ સૃષ્ટ્યૈ નમઃ ।
પશ્ચિમે - ૐ કીર્ત્યૈ નમઃ । વાયવ્યે - ૐ સન્ધ્યાયૈ નમઃ ।
ઉત્તરે - ૐ પુષ્ટ્યૈ નમઃ । ઈશાન્યે - ૐ ઉત્કૃષ્ટ્યૈ નમઃ ।
પીઠમધ્યે - ૐ ઋત્યૈ નમઃ ।
(તતઃ સ્વર્ણાદિ નિર્મિતં યન્ત્રં અગ્નિ ઉદ્ધારણપૂર્વકં
શ્રીં કમલાસનાયૈ નમઃ ઇતિ મન્ત્રેણ પુષ્પાદ્યાસનં દત્વા
પીઠમધ્યે સંસ્થાપ્ય, પ્રાણપ્રતિષ્ઠાં કૃત્વા મૂલેન મૂર્તિં
પ્રકલ્પ્ય, આવાહનાદિ ઉપચારૈઃ સંપૂજ્ય દેવ્યાજ્ઞાં ગૃહીત્વા
આવરણપૂજાં કુર્યાત્ ।)
પ્રથમાવરણપૂજા - ષટ્કોણકેસરેષુ
અગ્નિકોણે - ૐ શ્રાં હૃદયાય નમઃ ।
નૈરૃત્યે - ૐ શ્રીં શિરસે સ્વાહા ।
વાયવ્યે - ૐ શ્રૂં શિખાયૈ વષટ્ ।
ઈશાન્યે - ૐ શ્રૈં કવચાય હું ।
પૂજ્યપૂજકયોર્મધ્યે - ૐ શ્રૌં નેત્રત્રયાય વૌષટ્ ।
દેવી પશ્ચિમે - ૐ શ્રઃ અસ્ત્રાય પટ્ ।
ઇતિ ષડઙ્ગાનિ પૂજયેત્ તતઃ પુષ્પાઞ્જલિં આદાય મૂલં ઉચ્ચાર્ય -
ૐ અભીષ્ટસિદ્ધિં મે દેહિ શરણાગતવત્સલે ।
ભક્ત્યા સમર્પયે તુભ્યં પ્રથમાવરણાર્ચનમ્ ॥

દ્વિતીયાવરણપૂજા - પૂજ્યપૂજ્યકયોઃ અન્તરાલે પ્રાચ્યાદિ દિશઃ પ્રકલ્પયેત્
પૂર્વે ૐ વસુદેવાય નમઃ વાસુદેવ શ્રીપાદુકામ્ ।
દક્ષિણે ૐ સઙ્કર્ષણાય નમઃ ।
પશ્ચિમે ૐ પ્રદ્યુમ્નાય નમઃ ।
ઉત્તરે ૐ અનિરુદ્ધાય નમઃ ।
આગ્નેયે ૐ દમકાય નમઃ ।
નેરૃત્યે ૐ સલિલાય નમઃ ।
વાયવ્યે ૐ ગુગ્ગુલાય નમઃ ।
ઈશાન્યે ૐ ગુરુણ્ડિકાય નમઃ ।
દેવ્યાઃ દક્ષિણે ૐ શઙ્ખનિધયે નમઃ ૐ વસુન્ધારાયૈ નમઃ ।
દેવ્યાઃ વામે ૐ પદ્મનિધયે નમઃ ૐ વસુમત્યૈ નમઃ ।

(ઇતિ પૂજયિત્વા પુષ્પાઞ્જલિં આદાય -)
ૐ અભીષ્ટસિદ્ધિં મે દેહિ શરણાગતવત્સલે ।
ભક્ત્યા સમર્પયે તુભ્યં દ્વિતીયાવરણાર્ચનમ્ ॥

તૃતીયાવરણ પૂજા - તતઃ પત્રાગ્રેષુ પૂર્વાદિ ક્રમેણ -
પૂર્વે ૐ બલાક્યૈ નમઃ બલાકી શ્રીપાદુકામ્ ।
આગ્નેયે ૐ વિમલાયૈ નમઃ ।
દક્ષિણે ૐ કમલાયૈ નમઃ ।
નેઋત્યે ૐ વનમાલિકાયૈ નમઃ ।
પશ્ચિમે ૐ વિભીષિકાયૈ નમઃ ।
વાયવ્યે ૐ પાલિકાયૈ નમઃ ।
ઉત્તરે ૐ શાર્ઙ્ગ્યૈ નમઃ ।
ઈશાન્યે ૐ વસુમાલિકાયૈ નમઃ ।
(ઇતિ પૂજયિત્વા પુષ્પાઞ્જલિં આદાય -)
ૐ અભીષ્ટસિદ્ધિં મે દેહિ શરણાગતવત્સલે ।
ભક્ત્યા સમર્પયે તુભ્યં તૃતીયાવરણાર્ચનમ્ ॥

દશ દિક્પાલક પૂજા - ભૂપુરે પ્રાકારાદિ ક્રમેણ -
પૂર્વે ૐ લં ઇન્દ્રાય નમઃ ।
આગ્નેયે ૐ રં અગ્નયે નમઃ ।
દક્ષિણે ૐ યં યમાય નમઃ ।
નૈઋત્યે ૐ ક્ષં નિઋતયે નમઃ ।
પશ્ચિમે ૐ વં વરુણાય નમઃ ।
વાયવ્યે ૐ યં વાયવે નમઃ ।
ઉત્તરે ૐ કં કુબેરાય નમઃ ।
ઈશાન્યે ૐ હં ઈશાનાય નમઃ ।
ઈશાન-પૂર્વયોર્મધ્યે ૐ અં બ્રહ્મણે નમઃ ।
નિઋતિ-પશ્ચિમયોર્મધ્યે ૐ હ્રીં અનન્તાય નમઃ ।
ઇતિ દશ દિક્પાલકાન્ પૂજયેત્ -
અસ્ત્ર પૂજા - તત્ બાહ્યે -
પૂર્વે ૐ વં વજ્રાય નમઃ ।
આગ્નેયે ૐ શં શક્તયે નમઃ ।
દક્ષિણે ૐ દં દણ્ડાય નમઃ ।

નૈરૃત્યે        ૐ ખં ખડ્ગાય નમઃ ।

પશ્ચિમે        ૐ પં પાશાય નમઃ ।

વાયવ્યે        ૐ અં અઙ્કુશાય નમઃ ।

ઉત્તરે        ૐ ગં ગદાયૈ નમઃ ।

ઈશાન્યે        ૐ ત્રિં ત્રિશૂલાય નમઃ ।

ઈશાન-પૂર્વયોર્મધ્યે   ૐ પં પદ્માય નમઃ ।

નિરૃતિ-પશ્ચિમયોર્મધ્યે    ૐ ચં ચક્રાય નમઃ ।

ઇતિ અસ્ત્રાણિ પૂજયેત્ -

ધૂપદીપાદિ નીરાજનાનન્તરં સમ્યક્ પૂજયિત્વા જપં કુર્યત્ ।

ઇતિ શ્રીલક્ષ્મી વિશેષમન્ત્રાઃ સમ્પૂર્ણાઃ ।

Proofread by PSA Easwaran

*shrIlakShmI visheShamantrAH*

pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*